विवेश मञ्चान्तरराजमार्गं
पतिंवरा क्लृप्तविवाहवेषा ॥”)
खड्गकोषः । परिच्छदः । इति मेदिनी । रे । २८० ॥

परिवाहः, पुं, (पर्य्यूह्यते तृणादिकं येन । परि + वह् + घञ् ।) परीवाहः । जलोच्छ्वासः । इत्यमरटीकायां रमानाथः ॥ (यथा, रघुः । ८।७४।
“स विवेश पुरीं तया विना
क्षणदापायशशाङ्कदर्शनः ।
परिवाहमिवावलोकयन्
स्वशुचः पौरवधूमुखाश्रुषु ॥”)

परिविन्नः, पुं, (परि + विद् + क्तः ।) परिवित्तिः । यथा, उद्वाहतत्त्वे ।
“ज्येष्ठेऽनिर्विष्टे कनीयान् निर्व्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः ते सर्व्वे पतिताः ॥”

परिवित्तिः, पुं, ( परिवर्ज्जनं विन्दति लभते इति । परि + विद् + क्तिच् । ) परिवेत्तृज्येष्ठः । कृतविवाहस्यानूढ़ज्येष्ठभ्राता । इत्यमरः ।२।७।५६॥ ( यथा, मनुः । ३ । १७१ ।
“दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः ॥”)

परिविन्दन्, [ त् ] पुं, ( परित्यज्य ज्येष्ठं भ्रातरं विन्दति अग्न्याधानभार्य्यादिकं लभते इति । विद् + शतृ । ) परिवेदनकर्त्ता । यथा,—
“देशान्तरस्थक्लीवैकवृषणानसहोदरान् ।
वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः ॥
जड़मूकान्धबधिरकुब्जवामनकुण्ठकान् ।
अतिवृद्धानभार्य्यांश्च कृषिसक्तान् नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा ।
कुलटोन्मत्तचौरांश्च परिविन्दन् न दुष्यति ॥”
इत्युद्वाहतत्त्वे छन्दोगपरिशिष्टम् ॥

परिविष्णु, क्ली, सर्व्वतो विष्णुः । विष्णुं विष्णुं परि इत्यव्ययीभावसमासे दुर्गादासः ॥

परिवृंहितं, त्रि, वृहिधातोः कर्म्मणि क्तः । (ततः परितो वृंहितमिति । ) सर्व्वतोभावेन दीप्तिविशिष्टम् । सर्व्वतोभावेन करिगर्ज्जितम् । सर्व्वतोभावेन वृद्धिविशिष्टम् । सर्व्वतोभावेन ध्वनिविशिष्टम् ॥

परिवृढ़ः, त्रि, ( परिसर्व्वतोभावेन वृंहति वर्द्धते इति । वृहि वृद्धौ + कर्त्तरि क्तः । निपातनात् हकारलोपो निष्ठातस्य ढ़त्वञ्च । ) अधिपः । प्रभुः । इत्यमरः । ३ । १ । ११ ॥
( यथा, राजतरङ्गिण्याम् । ३ । २८२ ।
“जगत्परिवृढ़ः प्रौढ़प्रीतिस्तं स फलार्थिनम् ।
कृत्वा प्रादुष्कृतवपुस्ततो भूयोऽप्यभाषत ॥”)

परिवृतः, त्रि, (परिसर्व्वतोभावेन वृतः ।) आवृतः । वेष्टितः । यथा,—
“व्यवहारान् नृपः पश्येत् सभ्यैः परिवृतोऽन्वहम् ।”
इति मिताक्षरा ॥

परिवृत्तिः, पुं, ( परिवर्ज्जने वर्त्तते इति । परि + वृत + क्विप । ) परिवित्तिः । इति हड्डः ॥ (परि + वृत् + भावे क्तिन् । परिवर्त्तनम् । यथा, महाभारते । १४ । १८ । २६ ।
“तस्य कालपरीमाणमकरोत् स पितामहः ।
भूतेषु परिवृत्तिञ्च पुनरावृत्तिमेव च ॥”
अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । १०५ ।
“परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत् ॥”
क्रमेणोदाहरणं यथा,—
“दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम ।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः ॥”
अत्र प्रथमेऽर्द्धे समेन द्वितीयेऽर्द्धे न्यूनेन ॥)

परिवृंहितं, त्रि, सर्व्वतोभावेन वृद्धिविशिष्टम् । सर्व्वतोभावेनोद्यमविशिष्टम् । इति वृहधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नम् ॥

परिवेत्ता, [ ऋ ] पुं, ( परित्यज्य ज्येष्ठं भ्रातरं विन्दति भार्य्यामग्न्यादिकं वा लभते इति । विद लाभे + “ण्वुल्तृचौ ।” ३ । १ । १३३ । इति तृच् ।) अनूढ़ज्येष्ठे कृतविवाहकनिष्ठः । इत्युद्वाहतत्त्वम् ॥ ( यथा, मनुः । ३ । १७१ ।
“दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः ॥”)

परिवेदनं, क्ली, (परि + विद् + ल्युट् ।) विवाहः । अग्न्याधानम् । यथा,—
“क्लीवे देशान्तरगते पतिते भिक्षुकेऽपि वा ।
योगशास्त्राभियुक्ते च न दोषः परिवेदने ॥”
इत्युद्वाहतत्त्वे शातातपः ॥
सर्व्वतोभावेन ज्ञानम् । ( यथा, महाभारते । १४ । १६ । १२ ।
“स हि धर्म्मः सुपर्य्याप्तो ब्रह्मणः परिवेदने ।
न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः ॥”)
सर्व्वतोभावेन विचारणम् । सर्व्वतोभावेन विद्यमानत्वम् । सर्व्वतोभावेन लाभः ॥

परिवेदिनी, स्त्री, ( परिवेदोऽस्त्यस्यामिति । इनि ङीप् च । ) परिवेत्तुः स्त्री । इति हेमचन्द्रः ॥

परिवेदनीया, स्त्री, ( परिविद्यते या । परि + विद् अनीयर् । ) अनूढ़ज्येष्ठे तत्कनिष्ठेन विवाहिता कन्या । अस्य प्रमाणं परिदायिशब्दे द्रष्टव्यम् ॥

परिवेशः, पुं, (परितो विशतीति । परि + विश् + घञ् ।) वेष्टनम् । परिधिः । इति मेदिनी ।शे।३७॥
“वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः ।
मालाभा व्योम्नि तनुते परिवेशः प्रकीर्त्तितः ॥”
इति भरतधृतसाहसाङ्कः ॥

परिवेषः, पुं, ( परितो विष्यते व्याप्यतेऽनेन । विषिरौ व्यापने + घञ् ।) परिवृतिः । परिधिः । (बृहत्संहितायाम् ३४ अध्याये तल्लक्षणादिकमुक्तम् । तद्यथा,—
“सम्मूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः ।
नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः ॥
ते रक्तनीलपाण्डुरकापोताभाभ्रशवलहरिशुक्लाः ।
इन्द्रयमवरुणनिर्ऋतिश्वसनेशपितामहाग्निकृताः ॥
धनदः करोति मेचकमन्योऽन्यगुणाश्रयेण चाप्यन्ये ।
प्रविलीयते मुहुर्मुहुरल्पफलः सोपि वायुकृतः ॥
चाषशिखिरजततैलक्षीरजलाभः स्वकालसम्भूतः ।
अविकलवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः ॥
सकलगगनानुचारी नैकाभः क्षतजसन्निभो रूक्षः ।
असकलशकटशरासनशृङ्गाटकवत्स्थितः पापः ॥
शिखिगलसमेऽतिवर्षं बहुवर्णे नृपवधो भयं धूम्रे ।
हरिचापनिभे युद्धान्यशोककुसुमप्रभे चापि ॥
वर्णेनैकेन यदा बहुलः स्निग्धः क्षुराभ्रकाकीर्णः ।
स्वर्त्तौ सद्यो वर्षं करोति पीतश्च दीप्तार्कः ॥
दीप्तविहङ्गमृगरुतः कलुषः सन्ध्यात्रयोत्थितोऽतिमहान् ।
भयकृत्तड़िदुल्काद्यैर्हतो नृपं हन्ति शस्त्रेण ॥
प्रतिदिनमर्कहिमांश्वोरहर्निशं रक्तयोर्नरेन्द्रवधः ।
परिविष्टयोरभीक्ष्णं लग्नास्तनभःस्थयोस्तद्वत् ॥
सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्रकोपकरः ।
त्रिप्रभृतिशस्त्रकोपं युवराजभयं नगररोधम् ॥
वृष्टिस्त्र्यहेन मासेन विग्रहो वा ग्रहेन्दुभनिरोधे ।
होराजन्माधिपयोर्जन्मर्क्षे वाशुभो राज्ञः ॥
परिवेषमण्डलगतो रवितनयः क्षुद्रधान्यनाशकरः ।
जनयति च वातवृष्टिं स्थावरकृषिकृन्निहन्ता च ॥
भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्रभयम् ।
जीवे परिवेषगते पुरोहितामात्यनृपपीड़ा ॥
मन्त्रिस्थावरलेखकपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च ।
शुक्रे यायिक्षत्रियराज्ञां पीड़ा प्रियं चान्नम् ॥
क्षुदनलमृत्युनराधिपशस्त्रेभ्यो जायते भयं केतौ ।
परिविष्टे गर्भभयं राहौ व्याधिर्नृपभयञ्च ॥
युद्धानि विजानीयात् परिवेषाभ्यन्तरे द्वयोर्ग्रहयोः ।
दिवसकृतः शशिनो वा क्षुदवृष्टिभयं त्रिषु प्रोक्तम् ॥
याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं मृत्योः ।
प्रलयमिव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु ॥
ताराग्रहस्य कुर्य्यात् पृथगेव समुत्थितो नरेन्द्रवधम् ।
नक्षत्राणामथवा यदि केतोर्नोदयो भवति ॥
विप्रक्षत्रियविट्शूद्रहा भवेत् प्रतिपदादिषु क्रमशः ।
श्रेणीपुरकोशानां पञ्चम्यादिष्वशुभकारी ॥
युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोषकरः ।
पुररोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्याम् ॥
नरपतिपत्नीपीड़ां परिवेषोऽभ्युत्थितश्चतुर्दश्याम्।